श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीभाष्यकारप्रपत्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीभाष्यकारप्रपत्तिः ॥

श्रीवैष्णवागमपयोदधि पूर्णचन्द्र
श्रीशार्ङ्गिपद्म मकरन्दरसज्ञभृङ्ग।
गोविन्दवर्यकरसारसपूजितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ 1 ॥

श्रीशैलपूर्णमुखदेशिकलब्धबोध
तुर्याश्रमप्रथित मौनिकुल प्रदीप।
भट्टार्यवर्यकरनीरजपूजितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ 2 ॥

काञ्चीपुरीवरदराजकृपैकपात्र
रङ्गेश पूर्णकरुणा परिणामरूप।
वेदान्तदेशिककराम्बुज पूजितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ 3 ॥

श्रीयादवाद्रि पतिपादसरोजहंस
श्रीभूतपट्टणरमेश कटाक्ष धन्य।
शेषावतार कलिवैरिकरार्चितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ 4 ॥

श्रीवेङ्कटाचलपति प्रियलक्ष्मणार्य
सर्वज्ञभव्य यतिशेखर सार्वभौम।
वीक्षा वनेशहितकृष्णवनार्चितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ 5 ॥

पाषण्डजालतरुपावक सम्यमीन्द्र
जैनेभपञ्चमुखबौद्धतमो दिनेश।
लोकार्यहस्तसरसीरुह पूजितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ 6॥

चार्वाकशैलपतिवज्र कृपासमुद्र
काणाददानव सुदर्शन मौनिचन्द्र।
श्रीवेङ्कटेशकरपङ्कज पूजितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ 7॥

मिथ्याकथा कुमतिशीलभुजङ्ग तार्क्ष्य
कापालिकाम्बुधरमारुत वीतराग।
मन्नाथ केशवगुरूत्तमपूजितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ 8॥

त्रय्यन्तदेशिकपते वकुळाभिराम
पादारविन्द रससारस सारसाक्ष।
श्रीमत् शठारि मुनिवल्लभ पूजितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ 9॥

काषायरम्यकमनीय शिखोपवीत
दण्डत्रयोज्ज्वल करोल्लसितोर्ध्वपुण्ड्र।
उद्यद्दिनेश रुचिशोभित पाहि मां ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ 10॥

॥ इति श्रीभाष्यकारप्रपत्तिः समाप्ता॥